# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय ७१

एतदाख्याय रामाय महर्षिः कुम्भसम्भवः ।
अस्यामेवापरं वाक्यं कथायाम् उपचक्रमे ॥१॥

ततः स दण्डः काकुत्स्थ बहुवर्षगणायुतम् ।
अकरोत्तत्र मन्दात्मा राज्यं निहतकण्टकम् ॥२॥

अथ काले तु कस्मिंश्चिद्राजा भार्गवमाश्रमम् ।
रमणीयमुपाक्रामच्चैत्रे मासि मनोरमे ॥३॥

तत्र भार्गवकन्यां स रूपेणाप्रतिमां भुवि ।
विचरन्तीं वनोद्देशे दण्डोऽपश्यदनुत्तमाम् ॥४॥

स दृष्ट्वा तां सुदुर्मेधा अनङ्गशरपीडितः ।
अभिगम्य सुसंविग्नः कन्यां वचनमब्रवीत् ॥५॥

कुतस्त्वमसि सुश्रोणि कस्य वासि सुता शुभे ।
पीडितोऽहमनङ्गेन पृच्छामि त्वां सुमध्यमे ॥६॥

तस्य त्वेवं ब्रुवाणस्य मोहोन्मत्तस्य कामिनः ।
भार्गवी प्रत्युवाचेदं वचः सानुनयं नृपम् ॥७॥

भार्गवस्य सुतां विद्धि देवस्याक्लिष्टकर्मणः ।
अरजां नाम राजेन्द्र ज्येष्ठामाश्रमवासिनीम् ॥८॥

गुरुः पिता मे राजेन्द्र त्वं च शिष्यो महात्मनः ।
व्यसनं सुमहत्क्रुद्धः स ते दद्यान्महातपाः ॥९॥

यदि वात्र मया कार्यं धर्मदृष्टेन सत्पथा ।
वरयस्व नृप श्रेष्ठ पितरं मे महाद्युतिम् ॥१०॥

अन्यथा तु फलं तुभ्यं भवेद्घोराभिसंहितम् ।
क्रोधेन हि पिता मेऽसौ त्रैलोक्यमपि निर्दहेत् ॥११॥

एवं ब्रुवाणामरजां दण्डः कामशरार्दितः ।
प्रत्युवाच मदोन्मत्तः शिरस्याधाय सोऽञ्जलिम् ॥१२॥

प्रसादं कुरु सुश्रोणि न कालं क्षेप्तुमर्हसि ।
त्वत्कृते हि मम प्राणा विदीर्यन्ते शुभानने ॥१३॥

त्वां प्राप्य हि वधो वापि पापं वापि सुदारुणम् ।
भक्तं भजस्व मां भीरु भजमानं सुविह्वलम् ॥१४॥

एवमुक्त्वा तु तां कन्यां दोर्भ्यां गृह्य बलाद्बली ।
विस्फुरन्तीं यथाकामं मैथुनायोपचक्रमे ॥१५॥

तमनर्थं महाघोरं दण्डः कृत्वा सुदारुणम् ।
नगरं प्रययौ चाशु मधुमन्तमनुत्तमम् ॥१६॥

अरजापि रुदन्ती सा आश्रमस्याविदूरतः ।
प्रतीक्षते सुसन्त्रस्ता पितरं देवसंनिभम् ॥१७॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com